युगाब्दः ५११०
नवदेहली
श्रावणपूर्णिमा

आत्मीय-बन्धो,
श्रावण-पूर्णिमायाः शुभेच्छाः।
विश्व-संस्कृत-दिनस्य अभिनन्दनानि।

यद्यपि वर्षस्य ३६५ दिनानि अपि संस्कृतदिनानि भवेयुः इति अस्माकम् अपेक्षा, तथापि तस्यां दिशि गमनाय प्रकृतं विश्वसंस्कृतदिनम् आचरामः।

संस्कृतभाषया "वसुधैव कुटुम्बकम्", "स्वदेशो भुवनत्रयम्", "विश्वम् एकनीडम्", इति वैश्विकं चिन्तनं क्रियते। तादृश्या संस्कृतभाषया विश्वव्यापिन्या भवितव्यं, विश्वे सर्वेभ्यः सार्थक-साफल-जीवनशिक्षणं प्रदातव्यं, सुख-शान्ति-वर्धनं साधनीयम् इति एतेन उद्देशेन वयं विश्वसंस्कृतदिनम् आचरामः।

"सङ्गच्छध्वं, संवदध्वं, सं वो मनांसि जानताम्" इत्यादयः वेदमन्त्राः अस्मान् सहचिन्तनं, सहकारं, सहजीवनं च बोधयन्ति, समरसतां च पाठयन्ति। सर्वैः सह, मानवैः सह, पशु-पक्षिभिः सह, प्रकृत्या सह सामरस्यम् एव यथार्थं योग्यं जीवनं, सुख-शान्त्योः रहस्यं च।

स्नेहं ददाति चेद् एव स्नेहं प्राप्नोति। दानम् एव प्राप्तेः मूलम्। अतः वयं जीवने इतरेभ्यः विद्यां, धनं, सौकर्यम्, आत्मीयतां, प्रीतिं, शक्तिं, सुखं वा, यावद् अधिकं दद्मः (दानं कुर्मः) तावद् अधिकं तद् एव प्राप्नुमः। तस्माद् ददातु, ददातु, ददातु।

भवदीयं स्नेहाङ्कितं,

*चमूकृष्णशास्त्री*